# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 7** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.E.-1.2.2** समयः - 11 तः 02 पर्यन्तम्

दिनाङ्कः –18/04/2019 सन्दर्भग्रन्थः – पाराशरस्मृतिः (7-12 अध्यायाः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 अधोलिखितेषु द्वयोः ससन्दर्भान्वयप्रसङ्गपूर्वकं व्याख्यानं विधीयताम्। 10**

(1) मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्माणि।
चामसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥

(2) लूकिप्याद्युपधानानि रक्तवस्त्रादिकानि च।
शोषयित्वार्कतापेन प्रोक्षणाच्छुद्धतामियुः।

(3) यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
ब्राह्मणस्त्वनधीयानस्त्रयस्ते नामधारकाः ॥

**प्रश्नः-2 कस्याप्येकस्य सविस्तरमुत्तरं लिखत। 10**

(1) पराशरस्मृतेः महत्त्वम्।

(2) धर्मशास्त्रग्रन्थानां जीवने आवश्यकता।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 अधोलिखितेषु द्वयोः श्लोकयोः ससन्दर्भपूर्वकं भावार्थो लेख्यः। 10**

(1) शवां संरक्षणार्थाय न दुष्येत् रोधबन्धयोः।
तद्वधं तु न तं विद्यात् कामाकामकृतं तथा ॥

(2) गोवृषाणां विपत्तौ च यावन्तः प्रेक्षकाः जनाः।
अनिवारयतां तेषां सर्वेषां, पातकं भवेत् ॥

(3) गायत्री च जपेन्नित्यं दद्याद् गोमिथुनं द्वयम्।
विप्राय दक्षिणां दद्यात् शुद्धिमाप्नोत्यसंशयम् ॥

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं दीयताम। 10**

(1) पाराशरस्मृतेः दशमाध्यायस्य सारांशं लिखत।

(2) गोविपत्तिप्रकरणस्य सप्रमाणं सारांशं लिखत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 अधोलिखितश्लोकेषु द्वयोः ससन्दर्भप्रसङ्गान्वयपूर्वकं भावार्थं लिखन्तु।** **10**

(1) बालैर्नकुलमार्जारैरन्नमुच्छिष्टितं यदा।
तिलदर्भोदकैः प्रोक्ष्य शुद्ध्यते नात्र संशयः ॥

(2) युगे युगे च ये धर्मास्तेषु तेषु च ये द्विजाः।
तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥

(3) खलयज्ञे विवाहे च संक्रान्तौ ग्रहणे तथा।
शर्वर्यां दानमस्त्येव नान्यत्रैव विधीयते ॥

**प्रश्नः-6 एकस्य सविस्तरमुत्तरं यच्छत।** **10**

(1) विविधप्रकाराणां पापानां प्रायश्चित्तानि वर्णयत।

(2) प्राजापत्यव्रतविधानं यथाग्रन्थं स्पष्टयत।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघुत्तरेण लिखत।** **10**

(1) मृण्मयानां पात्राणां शुद्धिः केन भवति?

(2) धान्यानां शुद्धिः केन भवति?

(3) वेणुवल्लकलचीराणां शुद्धिः केन भवति?

(4) तूलिकादि-उपधानानां शुद्धिः केन कर्तव्या?

(5) स्वपापानि कस्मै निवेदितव्यानि?

(6) त्रैलोक्यं के तारयन्ति?

(7) मार्जारमक्षिकादिस्पृष्टे सति किं उच्छिष्टं भवेत्?

(8) महीं स्पृष्ट्वागतं तोयं कीदृशं भवेत्?

(9) गायत्रीरहितो विप्रः कीदृशो भवति?

(10) प्रायश्चित्तस्य व्यवस्था कस्मिन् स्थाने कर्तव्या?

(11) ब्राह्मणार्थे गवार्थे यः प्राणान् त्यजति सः कस्मात् पापात् प्रमुच्यते?

(12) शस्त्रप्रहारादिकृते गवि किंन्नामकं व्रतमाचरणीयम्?

(13) कुत्र गोवधप्रायश्चित्तं न विद्यते?

(14) मनूक्तप्रकारेण गोघ्ना किं नामकं व्रतं कर्तव्यम्?

(15) पाराशरस्मृतौ कति अध्यायाः सन्ति?